"दौश्यन्तमघ्वैस्तत्रापि प्रियया चोद्धवेन च।
पूजितः परया भक्त्या प्रत्युत्थानासनादिभिः ॥"
इति श्रीभागवते । १० । ६८ । २० ॥

प्रत्युत्पन्नः, त्रि, (प्रति+उत्+पद्+क्तः।) उत्पत्तिविशिष्टः। प्रत्युत्पूर्ब्बपद्धातोः कर्त्तरि क्तप्रत्ययेन निष्पन्नः ॥

प्रत्युत्पन्नमतिः, त्रि, (प्रत्युत्पन्ना मतिर्यस्य।) सूक्ष्मबुद्धियुक्तः। तत्पर्य्यायः। कुशाग्रीयमतिः २ सूक्ष्मदर्शी ३ तत्कालधीः ४। इति हेमचन्द्रः ॥ प्रतिभान्वितः। इति जटाधरः ॥ (यथा,—
"प्रत्युत्पन्नमतिर्धीमान् व्यवसायी विशारदः।
सत्यधर्म्मपरो यश्च स भिषक्पाद उच्यते ॥"
इति सुश्रुते सूत्रस्थाने ३४ अध्यायः ॥)

प्रत्युद्गमनीयं, क्ली, (प्रति+उत्+गम्+अनीयर्।) धौतांशुकद्वयम्। इति मेदिनी। ये,१३४॥ (यथा, कुमारे। ७। ११।
"सा मङ्गलस्नानविशुद्धगात्री
गृहीतप्रत्युद्गमनीयवस्त्रा ॥"
क्वचित् पत्युरुद्गमनीयवस्त्रा इत्यपि पाठः ॥) समुपस्थानयोग्ये पूजनीये च, त्रि। इति शब्दरत्नावली ॥

प्रत्युद्गमः, पुं, (प्रति+उत्+गम्+अप्।) प्रत्युत्थानम्। यथा, साहित्यदर्पणे तृतीयपरिच्छेदे। ७३।
"एकत्रासनसंस्थितिः परिहृता प्रत्युद्गमाद्-
दूरतः ॥"

प्रत्युद्गमनं, क्ली, (प्रति+उत्+गम्+ल्युट्।) प्रत्युत्थानम्। (यथा, प्रबोधचन्द्रोदये २ अङ्के।
"आर्य्य! प्रत्यासन्नो महाराजः। तत्प्रत्युद्गमनेन संभाव्यतामार्य्येण ॥")

प्रत्युषः, पुं, (प्रतोषति विनाशयति अन्धकारमिति। प्रति+उष् दाहे+"इगुपधज्ञेति।" ३। १। १३६। इति कः।) प्रत्यूषः। प्रातः। इत्यमरटीकायां मथुरेशः ॥ (यथा, पञ्चतन्त्रे। १। २१२।
"प्रत्युषे च स्वगृहमभ्युपेत्य द्वारदेशस्थितोऽपि विविधपौरहृत्योत्सुकतया तामाहेति ॥")

प्रत्युषः, [स्] क्ली, (प्रत्योषति नाशयत्यन्धकारमिति। प्रति+उष्+"उषः कित्।" उणा० ४। २३३। इति असिः। स च कित्।) प्रत्यूषः। इत्यमरः। १। ४। २॥ यथा, भरतधृतसूर्य्यशतके।
"याति व्यक्तिं पुरस्तादरुणकिसलये प्रत्युषः-
पारिजातः ॥"

प्रत्यूषः, पुं, (प्रत्यूषति रुजति कामुकानिति। प्रति+ऊष् रोगे+कः।) प्रभातम्। इत्यमरः। १। ४। २॥ (यथा, मेघदूते। ३२।
"दीर्घीकुर्व्वन् पटुमदकलं कूजितं सारसानां
प्रत्यूषेषु स्फुटितकमलामोदमैत्रीकषायः ॥")
सूर्य्यः। इति शब्दरत्नावली ॥ वसुभेदः। इति जटाधरः ॥ (यथा, विष्णुपुराणे।१।१५।११११।
"वसवोऽष्टौ समाख्यातास्तेषां वक्ष्यामि विस्तरम्।
आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः।
प्रत्यूषश्च प्रभावश्च वसवो नामभिः स्मृताः ॥")

प्रत्यूषः, [स्] क्ली, (प्रति+ऊष्+असिः।) प्रभातम्। इत्यमरटीकायां भरतः ॥ (यथा, सुश्रुते। १। २१।
"प्रत्यूषस्यपराह्णे तु जीर्णेऽन्ने च प्रकुप्यति ॥")

प्रत्यूहः, पुं, (प्रत्यूहनमिति। प्रति+ऊह्+घञ्।) विघ्नः। इत्यमरः। ३। २। १८ ॥ (यथा, मार्कण्डेये। १६। ५५।
"भर्त्तृशुश्रूषणादेव मया प्राप्तं महत् फलम्।
सर्व्वकामफलावाप्त्या प्रत्यूहाः परिवर्त्तिताः ॥")

प्रत्येकं, क्ली, एकं एकं प्रति। यथा, कर्पूराख्यस्तोत्रे।
"प्रत्येकं वा द्वयं वा त्रयमपि च परं बीज-
मत्यन्तगुह्यम् ॥"
(यथा च कुमारे। २। ३१।
"एवं यदात्थ भगवन्नाम्रेडं नः परैः पदम्।
प्रत्येकं विनियुक्तात्मा कथं न ज्ञास्यसि प्रभो! ॥")

प्रथ, क प्रक्षेपे। ख्यातौ। इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-अक०-च सेट्।) रेफयुक्तः। क, प्राथयति। इति दुर्गादासः ॥

प्रथ, म ष ङ ख्यातौ। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सेट्।) रेफयुक्तः। म, प्रथयति। ष, प्रथा। ङ, प्रथते गुणी प्रसिद्धः स्यादित्यर्थः। इति दुर्गादासः ॥

प्रथमः, त्रि, (प्रथते प्रसिद्धो भवतीति। प्रथ्+"प्रथेरमच्।" उणा० ५। ६८। इति अमच्।) प्रधानम्। (यथा, रघुः। १०। ६७।
"राम इत्यभिरामेण वपुषा तस्य चोदितः।
नामधेयं गुरुश्चक्रे जगत्प्रथममङ्गलम् ॥")
आदिमः। तत्पर्य्यायः। आदिः २ पूर्ब्बः ३ पौरस्त्यः ४ आद्यः ५। इत्यमरः ॥ अग्रिमः ६ इति जटाधरः ॥ प्राक् ७। इत्यव्ययवर्गे अमरः ॥ (यथा, विष्णुपुराणे। १। ११। ५२।
"बाह्यार्थानखिलांश्चित्तं त्याजयेत्प्रथमं नरः ॥")

प्रथा, स्त्री, (प्रथ्+"षिद्भिदादिभ्योऽङ्।"३।३।१०४। इत्यङ्। ततष्टाप्।) ख्यातिः। इत्यमरः। ३। २। ८॥ (यथा,) राजतरङ्गिण्याम्। १। १२।
"या प्रथामगमन्नेति सापि वाच्यप्रकाशने ॥")

प्रथितः, त्रि, (प्रथ्+क्तः।) ख्यातः। इत्यमरः। ३। १। ८॥ (यथा, रघुः। ८। ७६।
"तेनावतीर्य्य तुरगात् प्रथितान्वयेन
पृष्टान्वयः स जलकुम्भनिषण्णदेहः ॥"
स्वारोचिषमनोः पुत्रे, पुं। यथा, हरिवंशे। ७। १४।
"हविघ्नः सुकृतिर्ज्योतिरापो मूर्त्तिरयः स्मृतः।
प्रथितश्च नभस्यश्च नभ ऊर्ज्जस्तथैव च।
स्वारोचिषस्य पुत्रास्ते मनोस्तात! महात्मनः ॥")

प्रथितिः, स्त्री, (प्रथ्+"पदिप्रथिभ्यां नित्।" उणां ४। १८२। इति तिः। स च नित्।) ख्यातिः। प्रथधातोर्भावे क्तिप्रत्ययेन निष्पन्ना। इति व्याकरणम् ॥

प्रथिमा, [न्] पुं, (पृथोर्भावः। "पृथ्वादिभ्य इमनिज्वा।"५।१।१२२। इति इमनिच्। "ऋतो-हलादेर्लघोः।"६।४।१६१। इति रः। "टेः।" ६। ४। १५५। इति टेर्लोपः।) पृथोर्भावः। पृथुत्वम्। इति सिद्धान्तकौमुदी ॥ यथा,—
"प्रथिमानन्दधानेन घनेन जघनेन सा ॥"
इति भट्टिः। ४। १७ ॥
त्रि, अतिशयेन पृथुः। पृथुशब्दादतिशयार्थे इमन्प्रत्ययेन निष्पन्नः। इति व्याकरणम् ॥

प्रथिमिनी, स्त्री, (प्रथिमास्त्यस्या इति। प्रथिमन्+"संज्ञायां मन्माभ्याम्।" ५। २। १३७। इति इनिः।) प्रथिमयुक्तस्त्री। इति सिद्धान्तकौमुदी ॥

प्रथिष्ठः, त्रि, अतिशयेन पृथुः। (पृथु+इष्ठन्।) अतिहृहत्। इति मुग्धबोधव्याकरणम् ॥

प्रथुकः, पुं, पृथुकः। इत्यमरटीकायां रायमुकुटः ॥

प्रदः, त्रि, प्रकर्षेण ददाति यः। (प्र+दा+कः।) प्रदाता। इति सिद्धान्तकौमुदी ॥ (कर्म्मण्युपपदे तु "प्रे दाज्ञः।" ३। २। ६। इति कः। यथा, मनुः। ४। २३२।
"यानशय्याप्रदो भार्य्यामैश्वर्य्यमभयप्रदः ॥")

प्रदक्षिणं, क्ली, पुं, (प्रगतं दक्षिणमिति। "तिष्ठद्गुप्रभृतीनि च।" २। १। १७। इति समासः।) दक्षिणावर्त्तेन देवादिकमुद्दिश्य भ्रमणम्। यथा,
"एकं देव्यां रवौ सप्त त्रीणि कुर्य्याद्विनायके।
चत्वारि केशवे कुर्य्यात् शिवे चार्द्धप्रदक्षिणम् ॥"
इति कर्म्मलोचनम् ॥
सर्व्वदेवतातुष्टिदप्रदक्षिणं यथा,—
"प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः।
दक्षिणं दर्शयन् पार्श्वं मनसापि च दक्षिणः ॥
सकृत्त्रिर्व्वा वेदयेत्ता देव्याः प्रीतिः प्रजायते।
स च प्रदक्षिणो ज्ञेयः सर्व्वदेवौघतुष्टिदः ॥
सर्व्वान् कामान् समामाद्य पश्चान्मोक्षमवा-
प्नुयात् ॥
मनसापि च यो दद्याद्देव्यै भक्त्या प्रदक्षिणम्।
प्रदक्षिणाद्दृयमगृहे नरकाणि न पश्यति ॥"
इति कालिकापुराणे ७० अध्यायः ॥ * ॥
अपि च। तन्त्रसारे।
"दक्षिणादायवीं गत्वा दिशं तस्याश्च शाम्भवीम्।
ततश्च दक्षिणां गत्वा नमस्कारस्त्रिकोणवत् ॥
अर्द्धचन्द्रं महेशस्य पृष्ठतश्च समीरितम्।
शिवप्रदक्षिणे मन्त्री अर्द्धचन्द्रक्रमेण तु ॥
सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत् ॥"
सोमसूत्रं जलनिःसरणस्थानम्।
"प्रसार्य्य दक्षिणं हस्तं स्वयं नम्रशिराः पुनः।
दर्शयेद्दक्षिणं पार्श्वं मनसापि च दक्षिणः ॥
त्रिधा च वेष्टयेत् सम्यक् देवतायाः प्रदक्षिणम् ॥
एकहस्तप्रणामश्च एकं वापि प्रदक्षिणम्।
अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् ॥"
(समर्थे, त्रि। यथा, रामायणे।३। ४३। ५१।
"प्रदक्षिणेनातिबलेन पक्षिणा
जटायुषा बुद्धिमता च लक्ष्मण! ॥"